नामांक Roll No.

| | | | | | | |
|---|---|---|---|---|---|---|
| | | | | | | |

No. of Questions – **23**

No. of Printed Pages – **7**

# UP-(P)-95-संस्कृतम्

## प्रारम्भिक शिक्षा पूर्णता प्रमाण-पत्र-परीक्षा – 2017

## कक्षा – 8

# संस्कृतम्

समय : **2.30** होरा ] [ पूर्णांका : **80**

**परीक्षार्थिभ्य: सामान्यनिर्देशा:**

(1) परीक्षार्थिभि: सर्वप्रथमं स्वप्रश्नपत्रोपरि नामाङ्का: अनिवार्यत: लेख्या: ।

(2) **सर्वे** प्रश्ना: अनिवार्या: ।

(3) सर्वेषां प्रश्नानामुत्तराण्युत्तरपुस्तिकायामेव लेखनीयानि ।

(4) एकस्य प्रश्नस्य सर्वे भागा: एकत्र एव लेखनीया: ।

1. पूजा स्थानमस्ति – **1**

(क) वय: (ख) लिङ्गम्

(ग) जाति: (घ) गुणा:

2. महेश्वरसूत्राणि सन्ति – **1**

(क) द्वादश (ख) चतुर्दश

(ग) त्रयोदश (घ) पञ्चदश



Downloaded from www.cclchapter.com

3. 'रामायणम्' कः लिखितवान् ? **1**

(क) मनुः (ख) वेदव्यासः

(ग) वाल्मीकिः (घ) विष्णु शर्मा

4. अङ्गविकारे विभक्तिः भवति – **1**

(क) तृतीया (ख) चतुर्थी

(ग) पञ्चमी (घ) सप्तमी

5. लोकयात्रा कर्तव्या – **1**

(क) सावधानतया (ख) असावधानतया

(ग) स्वेच्छया (घ) भक्त्या

6. सन्धि-विच्छेदं कुरूत – **1 + 1 + 1 + 1 = 4**

(क) दुश्चरित्राः __________

(ख) सुचरित्राश्च __________

(ग) कविर्जयति __________

(घ) विचित्रो वर्तते __________

7. निर्देशानुसारं शब्द-रूपाणि लेख्यानि – **½ + ½ + ½ + ½ = 2**

(क) (राजन्) (प्रथमाविभक्तिः, बहुवचनम्)

(ख) 'जगत्' (सप्तमीविभक्तिः, एकवचनम्)

(ग) 'तद्' (पुंल्लिङ्ग – तृतीयाविभक्तिः, द्विवचनम्)

(घ) 'यद्' (स्त्रीलिङ्ग – चतुर्थीविभक्तिः, एकवचनम्)



Downloaded from www.cclchapter.com

8. निम्नाङ्कितानां वर्णानाम् उच्चारणस्थानानि लिखन्तु : **½ + ½ + ½ + ½ = 2**

(क) इ (ख) ग

(ग) ल (घ) ट

9. विशेषणपदानि विशेष्यपदानि च सम्यक्तया मेलयन्तु – **½ + ½ + ½ + ½ = 2**

| | **(विशेषणपदानि)** | | **(विशेष्यपदानि)** |
|---|---|---|---|
| (क) | आदर्श: | – | फलानि |
| (ख) | पवित्रम् | – | महिला |
| (ग) | सुन्दरी | – | जलम् |
| (घ) | चत्वारि | – | विद्यालय: |

10. अधोलिखितानां गुणकानां गुणनफलानि संस्कृतशब्देषु लिखत : **1 + 1 + 1 + 1 = 4**

(क) $11 \times 2$ = _______ (ख) $12 \times 4$ = ________

(ग) $14 \times 5$ = _______ (घ) $15 \times 6$ = ________

11. निर्देशानुसारं पूरयन्तु : **1 + 1 + 1 + 1 = 4**

| | **(विग्रहवाक्यम्)** | | **(समस्तपदम्)** |
|---|---|---|---|
| (क) | नगरस्य समीपम् | = | ____________ |
| (ख) | कूपं पतित: | = | ____________ |
| (ग) | पञ्चानां पात्राणां समाहार: | = | ____________ |
| (घ) | पीतम् अम्बरं यस्य स: | = | ____________ |



Downloaded from www.cclchapter.com

12. निर्दिष्टानां शब्दानाम् **एकम्-एकम्** पर्यायवाचिशब्दं लिखत : **½ + ½ + ½ + ½ = 2**

(क) भूमि:

(ख) पिता

(ग) भगिनी

(घ) देवता

13. निम्नलिखितान् प्रश्नान् पूर्णवाक्येन उत्तरत : **2 × 6 = 12**

(क) डॉ. ए.पी.जे. अब्दुल कलाम महोदयस्य पूर्णं नाम लेखनीयम् ।

(ख) द्रौपदी गङ्गातीरे किं करोति ?

(ग) काल: केषां साक्षी अस्ति ?

(घ) मानवानां प्रबला: शत्रव: के सन्ति ?

(ङ) संस्कारै: केषां विकास: परिष्करणं च भवति ?

(च) वयम् अवकरं क्षेप्तुं कुत्र गच्छाम: ?

14. अधोलिखितेषु वाक्येषु पञ्चवाक्यानां संस्कृतभाषायाम् अनुवादो विधेय : **1 × 5 = 5**

(क) ऋचा पुस्तक पढ़ती है ।

(ख) सोमदत्त खेलता है ।

(ग) छात्र मैदान में खेलते हैं ।

(घ) यह भवन सुन्दर है ।

(ङ) हमारे देश का नाम भारतवर्ष है ।

(च) परोपकार के लिये यह शरीर है ।

(छ) राकेश भोजन करता है ।

(ज) कल अवकाश होगा ।



Downloaded from www.cclchapter.com

15. यथेच्छं पञ्चवाक्यानां हिन्द्यामनुवादो विधेय: – **1 × 5 = 5**

(क) सत्यं वद ।

(ख) मातृदेवो भव: ।

(ग) स्वाध्याय: परमं तप: ।

(घ) विद्वान् सर्वत्र पूज्यते ।

(ङ) संसर्गजा दोषगुणा: भवन्ति ।

(च) अहिंसा परमो धर्म: ।

(छ) तमसो मा ज्योतिर्गमय ।

(ज) विद्या ददाति विनयम् ।

(झ) ज्ञानं भार: क्रियां विना ।

(ञ) अति सर्वत्र वर्जयेत् ।

16. यथा योग्यं योजयतु – **½ + ½ + ½ + ½ = 2**

| | **सूत्राणि** | | **उदाहरणानि** |
|---|---|---|---|
| (क) | कर्मणि द्वितीया | – | राज्ञ: पुरुष: । |
| (ख) | चतुर्थी सम्प्रदाने | – | रामेण बाणेन हतो बाली । |
| (ग) | षष्ठी शेषे | – | विप्राय गां ददाति । |
| (घ) | कर्तृकरणयोस्तृतीया | – | देवदत्त: हरिं भजति । |

17. रिक्तस्थाने योग्यपदं योजयतु – **½ × 6 = 3**

(क) वैद्य: _________ औषधं ददाति । (रोगिणम् / रोगिण: / रोगिणे)

(ख) ________ कमलानि विकसितानि सन्ति । (सरिद्भ्य: / सरित्सु / सरिद्भि:)

(ग) स: ________ तिष्ठति । (गृहम् / गृहे / गृहस्य)

(घ) ________ गृहं समीपे अस्ति । (भिषक् / भिषज: / भिषजम्)

(ङ) परिश्रमयुक्तेन ________ उत्तमं फलं प्राप्यते । (कर्मणा / कर्मणे / कर्मणि)

(च) परिवर्तनं ________ स्वभाव: भवति । (जगत् / जगता / जगत:)



Downloaded from www.cclchapter.com

18. अधोलिखितं गद्यांशं पठित्वा प्रश्नानामुत्तराणि संस्कृतभाषायां लिखत : **1 × 5 = 5**

अयं लोकः अतीव विचित्रो वर्तते । अत्र मूर्खाः, विज्ञाः, बुद्धिमन्तः, दुर्मतयः, कर्मठाः, अलसाः, दुश्चरित्राः, सुचरित्राश्च जनाः निवसन्ति । अत्र जगति विज्ञाः मूर्खान् धिक् कुर्वन्ति । ये स्वबन्धून् प्रति निर्दयाः भवन्ति, तान् अपि जनाः धिक् कुर्वन्ति । ये शिष्याः गुरुन् निन्दन्ति, तान् लोकः धिक् करोति ।

(क) अयं लोकः कीदृशः वर्तते ? **1**

(ख) अत्र के के जनाः निवसन्ति ? **1**

(ग) विज्ञाः कान् धिक् कुर्वन्ति ? **1**

(घ) गद्यांशस्य उचितशीर्षकं लिखतु । **1**

(ङ) उपसर्गयुक्तं शब्दं गद्यांशात् चित्वा लिखत । **1**

19. अधोलिखितशब्दान् आधारीकृत्य स्वरचितवाक्येषु प्रयोगं कुरूत – **1 × 6 = 6**

(क) कूपः

(ख) घटः

(ग) सोपानम्

(घ) द्वारम्

(ङ) प्रासादः

(च) कृषकः

20. कस्यापि **एकस्य** श्लोकस्य भावार्थः हिन्द्यां लेख्यः – **1½ + 1½ = 3**

(क) अयं निजः परोवेति, गणनालघुचेतसाम् ।
उदारचरितानां तु, वसुधैव कुटुम्बकम् ।।

(ख) विद्या ददाति विनयं, विनयाद्यायाति पात्रताम् ।
पात्रत्वाद्धनमाप्नोति, धनाद् धर्मः ततः सुखम् ।।

21. द्वौ श्लोकौ लिखत, यौ अस्मिन् प्रश्नपत्रे न स्याताम् । **2 + 2 = 4**



Downloaded from www.cclchapter.com

22. स्वां "दीपिका" इति मत्वा राजकीय-प्रवेशिका-संस्कृत-विद्यालय:, विदिशा, प्रधानाध्यापकाय दिनत्रयस्य अवकाशाय प्रार्थना-पत्रं लिखत । **5**

**अथवा**

भवत: नाम 'हरित:' अस्ति । भवत: मित्रं माधव: अस्ति । अत: माधवाय स्वच्छताविषयोपरि पत्रं लिखत ।

23. अधोलिखितेषु कमपि विषयमवलम्ब्य संस्कृते निबन्ध: लेख्य: – **5**

(क) सदाचार: ।

(ख) अस्माकं ग्राम: ।

(ग) संस्कृतभाषाया: महत्त्वम् ।

(घ) उद्यानम् ।



Downloaded from www.cclchapter.com

Downloaded from www.cclchapter.com